# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – साहित्यम् (ध्वनिवर्गः)** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – ध्वन्यालोकः तृतीयोद्योतः** | |

**सूचना -** **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समान गुणाः। (१०)**

**प्रश्नः १** **अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत।**

१ असमासा समासेन मध्यमेन च भूषिता।
तथा दीर्घसमासेति त्रिधा सङ्घटनोदिता॥

२ एतद्यथोक्तमौचित्यमेव तस्य नियामकम्।
सर्वत्र गद्यबन्धेऽपि च्छन्दोनियमवर्जिते॥

३ सुप्तिङ्वचनसम्बन्धैस्तथा कारकशक्तिभिः।
कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित्॥

४ प्रबन्धे मुक्तके वापि रसादीन् बन्धुमिच्छता।
यत्नः कार्यः सुमतिना परिहारे विरोधिनाम्॥

**प्रश्नः २** अविवक्षितवाच्यस्य अत्यन्ततिरस्कृतवाच्यादिप्रकारवर्णनं सोदाहरणं सङ्क्षेपेण विधेयम्।

**प्रश्नः ३** असंलक्ष्यक्रमव्यङ्ग्यप्रकाराः सङ्क्षेपेण सोदाहरणं वर्णनीयाः।

**प्रश्नः ४** सङ्घटनानिरूपणं गुणसम्बन्धसहितं नियामकतत्त्वसहितं विवेचनीयम्।

**प्रश्नः ५** अनुरणनात्मकव्यङ्ग्यस्यापि प्रबन्धव्यञ्जकत्वं ग्रन्थकारोक्तदिशा साधनीयम्।

**प्रश्नः ६** **अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्या कार्या।**

१ विरोधिरससम्बन्धिविभावादिपरिग्रहः।
विस्तरेणान्वितस्यापि वस्तुनोऽन्यस्य वर्णनम्॥

२ वाच्यानां वाचकानां च यदौचित्येन योजनम्।
रसादिविषयेणैतत्कर्म मुख्यं महाकवेः॥

३ रसाद्यनुगुणत्वेन व्यवहारोऽर्थशब्दयोः ।
औचित्यवान् यस्ता एता वृत्तयो द्विविधाः स्थिताः ॥
४ सगुणीभूतव्यङ्ग्यैः सालङ्कारैः सह प्रभेदैः स्वैः ।
सङ्करसंसृष्टिभ्यां पुनरप्युद्द्योतते बहुधा ॥

प्रश्नः ७ विरोधिरसव्यवस्था ग्रन्थकारेण कथं व्यवस्थापिता इति सयुक्ति सङ्क्षेपेण वर्णनीयम् ।

प्रश्नः ८ व्यञ्जनाविचारः पूर्वपक्षीयमतपूर्वकं ग्रन्थकारसम्मतः सरलसुरगिरा प्रस्तोतव्यः ।

प्रश्नः ९ गुणीभूतव्यङ्ग्यस्य सङ्क्षिप्तं वर्णनं यथाग्रन्थं सरलसुरगिरा विधेयम् ।

प्रश्नः १० शान्तरसस्थापनपूर्वकं शृङ्गाररसस्य विशिष्टं स्थानं ग्रन्थकाराभिमतं व्यवस्थापनीयम् ।

प्रश्नः ११ **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ 'अविवक्षितवाच्यः' इति कतमशक्तिमूलकः ?
२ व्यञ्जकमुखेन ध्वनिभेदाः कस्मिन् उद्योते ?
३ अत्यन्ततिरस्कृतवाच्यः कस्य ध्वनेः उपभेदः ?
४ 'सप्तैता समिधः श्रियः' इति कस्य वचनम् ?
५ अलक्ष्यक्रमव्यङ्ग्यः ध्वनिः कुत्र कुत्र दीप्यते ?
६ कुत्र रसे शषढादयः वर्णाः विरोधिनः स्युः ?
७ कस्याः नियमे हेतुरौचित्यं वक्तृवाच्ययोः ?
८ कस्मादृते (विना) नान्यद् रसभङ्गस्य कारणम् ?
९ मुख्या व्यापारविषयाः सुकवीनां के सन्ति ?
१० 'अयं स रसनोत्कर्षी'ति कीदृशरसव्यवस्थायाम् ?
११ 'सुकुमारतमो ह्यसौ' इति कस्य रसस्य कृते ?
१२ 'गङ्गायां घोषः' इति कस्याः शक्तेः उदाहरणम् ?
१३ सामान्यतया 'गुणवृत्तिः' इति किम् ?
१४ कुत्र व्यङ्ग्यार्थः गौणः वाच्यार्थचारुत्वप्रकर्षश्च ?
१५ 'किमिव हि मधुराणां मण्डनं नाकृतीनाम्' इति कस्य कवेः वचनं ध्वनिकारेण उद्धृतम् ?

****